National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2025; 1(63): 253-256
© 2025 NJHSR
www.sanskritarticle.com

**Dr. Anjali Kabat**
Asst. Professor (Guest),
Department of Sanskrit,
Rajendra University, Prajna Vihar,
Balangir, Odisha

**Correspondence:**
**Dr. Anjali Kabat**
Asst. Professor (Guest),
Department of Sanskrit,
Rajendra University, Prajna Vihar,
Balangir, Odisha

# "विलियामजोन्स्-महोदयकृत-अभिज्ञानशकुन्तलानुवादस्य एकमध्ययनम्"

**Dr. Anjali Kabat**

**DOI:** https://doi.org/10.5281/zenodo.19842165

**शोधसारः**

'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा' इति सूक्तिरियं नितरां प्रथितयशां विदुषां भारतीयसाहित्यिकानां वा गीतं गायति। तत्रैव कविकुलगुरुनाम्ना शोशुभ्यमानः कालिदासः निजकृतिना अभिज्ञानशकुन्तलनामकनाटकेन तदितराभिश्च कृतिभिः न केवलं भारते, अपि तु पाश्चात्येऽपि प्रसिद्धिं प्राप्तः इत्यत्र नास्ति संशयप्रति। अस्य एव अभिज्ञानशकुन्तलनामधेयस्य नाटकस्य अनुवादः आङ्गल-फ्रेन्च्-जर्मान्-इत्यादिभिः बहुभिरपि भाषाभिः सञ्जातः। तस्य एव आङ्गलानुवादः 1789 तमे वर्षे विलियामजोन्स्-महोदयेन विहितः अस्ति इति अभूतपूर्वा एका सृष्टिः।

कालिदासः Shakespeare of India इति नाम्ना अपि प्रसिद्धः अस्ति। बहवोऽपि कवयः साहित्यिकाः कालिदासस्य प्रशंसां चक्रुः। एवमेव महान् पण्डितः जोन्स्-महोदयः अपि समेषां हृदयम् आह्लादितवान् तदीयकृतिभिः। वस्तुतः पाश्चात्यसाहित्यं भारतीयसाहित्येन सह भिन्नम् इव वर्तते, पाश्चात्यप्रकृतिः भारतीयप्रकृतिसदृशी प्रायशः न भवति, वैयक्तिकसिद्धान्तस्य दर्शनात्। एतच्च उभयम् अवलोक्यैव ज्ञायते। न केवलं साहित्यकृतिषु भेदः, अपि तु मूलग्रन्थात् अनुवादग्रन्थेषु अपि भेदः दरीदृश्यते। कारणं हि, संस्कृते शब्दार्थबोधः 'संयोगो विप्रयोगश्च साहचर्यं विरोधिता' इत्यादिभिः बहुभिः प्रकारैः भवति, एकश्च शब्दः अनेकार्थकः, कवेः अभिप्रायोऽपि भिद्यते प्रकरणवशात्। अतः सर्वमेतत् क्वचित्स्थलेषु दृश्यते विलियामजोन्स्-महोदयकृते Sacontalá or, The Fatal Ring इति नामधेये अभिज्ञानशकुन्तलानुवादे। तदस्मिँल्लेखे यथाशक्यं यथामति प्रतिपादितम् अस्ति। विषयोऽयं न केवलम् अनुवाद-अध्ययनदृष्ट्या (Translation Studies) उपयोगी भवति, अपि तु तुलनात्मकसाहित्यस्य (Comparative Literature) क्षेत्रेषु अपि विशिष्टं महत्त्वम् आदधाति।

**शोधालेखः**

गीर्वाणभारत्याम् अस्यां संस्कृतभाषायां नैके कवयः विद्वत्तल्लजाः जनिम् अलभन्त। ते कवयः न केवलं स्वस्वक्षेत्रं स्वप्रतिभया अलङ्कृतवन्तः, अपि तु सहृदयहृदयं चापि मुग्धं चक्रुः। महर्षिवाल्मीकिविरचितरामायणमहाकाव्याद् आरभ्य अद्यापि संस्कृतसाहित्यम् अवलम्ब्य बहूनि काव्यानि विरच्यमानानि सन्ति। तत्रैव ई.पू. प्रथमशताब्द्याम् आविर्भूतो महाकविपदम् अलङ्कृतः कालिदासः तदीयकृतिभिः साहित्यजगति प्रसिद्धिं गतः। ऋतुसंहारम्, कुमारसम्भवम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, मेघदूतम्, रघुवंशम्, अभिज्ञानशकुन्तलं चेति रचनाः विख्याताः एव। उपमासम्राट् अयं कालिदासः तदीयरचनाशैलीवशात् साहित्यशिखरं सम्प्राप्तः। यथा उच्यते केनचित् कविना –

**"अस्पृष्टदोषा नलिनीव दृष्टा**
**हारावलीव ग्रथिता गुणौघैः।**
**प्रियाङ्कपालीव प्रकामहृद्या**
**न कालिदासादपरस्य वाणी॥"**

अस्य कालिदासस्य सन्दर्भे यद्वा कथयामि तदेव स्वल्पमिव प्रतिभाति। वस्तुतः तस्य सर्वाः अपि कृतयः सुख्याताः एव, किन्तु तत्रापि अभिज्ञानशकुन्तलनामकं सप्ताङ्कात्मकं नाटकं विरचय्य तस्य यशः आविश्वं व्याप्तम् अभूत्। तथा हि उच्यते – कालिदासस्य सर्वस्वम् अभिज्ञानशकुन्तलम् इति। तदपि जर्मनकवि-गेटे-महोदयेन अपि उक्तमस्ति यत् –

**"वासन्तं कुसुमं फलं च युगपद् ग्रीष्मस्य सर्वं च यद्**
**यच्चान्यन्मनसो रसायणमतः सन्तर्पणं मोहनम्।**
**एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलोकयोः**
**ऐश्वर्यं यदि वाञ्छसि प्रियसखे! शाकुन्तलं सेव्यताम्॥"**[1]

अपूर्वमिदं नाटकं सप्तदशाधिकभाषाभिः अनूदितमस्ति। न केवलं भारतीयभाषाभिः, अपि तु आङ्गल-फ्रेञ्च्-जर्मन्-डच्-स्विडिश्-ड्यानिश्-इटालियन्-स्पानिश्-राशियान्-पलिश्-बहेमियन्-

इत्यादिभिः पाश्चात्यभाषाभिः अपि अनूदितम् इदं नाटकम्। एतासु भाषासु आङ्गलभाषया अनुवादः बहुभिः कृतः अस्ति। तेषु अष्टादशशताब्द्याम् आविर्भूतः विलियामजोन्स्-महोदयः सर्वप्रथमं संस्कृतं पठित्वा संस्कृतसाहित्यं तदीयपाश्चात्यजगति विस्तार-यामास। 1789 तमे वर्षे अभिज्ञानशकुन्तलनाटकस्य तत्कृतानुवादः Sacontalá or, The Fatal Ring पाश्चात्यसाहित्ये एकं महत् स्थानं बिभर्त्ति।

वस्तुतः शैलीचरित्रविषयवस्त्वादिदृष्ट्या पाश्चात्यसाहित्यं भारतीयसाहित्यात् बहुधा भिद्यते। तदपि अस्मिन् अनुवादे क्वचित् दृश्यते। तदेव मम आलोचनाविषयत्वेन परिगणयितुं शक्यते। अत एव शोधालेखस्य अस्य शीर्षकमेतत् स्थापितम् – "विलियामजोन्स्-महोदयकृत-अभिज्ञानशकुन्तलानुवादस्य एकमध्ययनम्" इति। कस्मिंश्चित् शास्त्रे प्रवेशात् प्राक् तस्य शास्त्रस्य किञ्चित् सामान्यं ज्ञानमावश्यकं भवति। तस्य विषयप्रयोजनादिनिरूपणाय अनुबन्धचतुष्टयं ग्रन्थादौ निरूप्यते। अतः अनुबन्धानां ज्ञानाद् अनन्तरमेव कस्मिंश्चित् शास्त्रे पुरुषस्य प्रवृत्तिः सम्भवति। विषयः, प्रयोजनम्, सम्बन्धः, अधिकारी इति चत्वारः अनुबन्धाः। विलियामजोन्स्-महोदयकृतानुवादस्य रचनाशैली, कालिदासस्य रचनाशैलीतः कथं भिद्यते, पाश्चात्यरचनाशैली वा कीदृशी इत्यादिविचारः एव लेखस्यास्य विषयः। उक्तविषयस्य अध्ययनेन उभयविधसाहित्यस्य ज्ञानम् एव लेखस्यास्य प्रयोजनम्। अयं लेखः भवति बोधकः, उक्तविषयज्ञानं भवति बोध्यम्, अतः विषयेण सह लेखस्यास्य बोध्यबोधकभावसम्बन्धः। उक्तविषयस्य जिज्ञासुः एव अत्र अधिकारी भवति।

**अभिज्ञानशकुन्तलं तथा च Sacontalá or, The Fatal Ring इत्यनयोः तुलना**

कालिदासविरचितस्य अभिज्ञानशकुन्तलनामकनाटकस्य अनुवादः ऐतिहासिकदृष्ट्या अतीव महत् स्थानं भजते। यतो हि, अनेन अनुवादेन पाश्चात्ये भारतीयसंस्कृतौ, भारतीयसाहित्ये, भारतीय-सौन्दर्यशास्त्रे च रुचिः उत्पन्ना। तथापि, अनुवादप्रक्रियायां भाषायाः, संस्कृतेः भावबोधस्य वा परिवर्तनं स्वाभाविकम् एव इति निश्चप्रचम्। कालिदासस्य काव्यात्मकसङ्केतं, रसव्यञ्जनां तथा दार्शनिकगाम्भीर्यं विलियामजोन्स्-महोदयः पाश्चात्यसाहित्यिक-दृष्ट्या भाषागतशैलीदृष्ट्या च प्रास्तौत्।

अतः एतद्द्वयकृतीनां तुलनात्मकम् अध्ययनम् इदम् अवबोधयति यत् एका एव कथा कथम्प्रकारेण भिन्नभाषासु, भिन्नसंस्कृतौ तथा भिन्नदार्शनिकसन्दर्भेषु परिवर्तते इति। अध्ययनमिदं न केवलम् अनुवाद-अध्ययनदृष्ट्या (Translation Studies) उपयोगि भवति, अपि तु तुलनात्मकसाहित्यस्य (Comparative Literature) क्षेत्रेषु अपि विशिष्टं महत्त्वम् आदधाति। अतः तदेव अध्ययनम् अधस्तात् यथामति यथाशक्ति आलोच्यते।

**१) भाषा**

कालिदासस्य भाषायाः विषये पूर्णाधिकारः आसीत्। तस्य च भाषा परिमार्जिता परिष्कृता भावगम्भीरा च। स कालिदासः चरित्रानुगुणं भाषायाः प्रयोगे पटुः आसीत्। यो वा जनः यत्कोटिविशिष्टः अस्ति, तस्य कृते भावप्रकाशनाय तादृशभाषायाः उपयोगः विहितः। यथा कण्वस्य कृते ऋष्यनुरूपा भाषा प्रयुक्ता – "दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुतिः पतिता"[2] इत्यादिः। विदूषकस्य उक्तयः तद्गतचञ्चलचित्ततां तद्गतभोजनादि-प्रियतां वा आवेदयति। स्त्रीणामपि भाषाः तासां स्वभावानुकूला एव।

किन्तु, जोन्स्-महोदयस्य अनुवादे तथा भेदः न परिलक्ष्यते, केवलम् अनुवादमात्रमेव। कालिदासस्य मूलांशात् भावशः अनुवादो विहितः। यतो हि, तत्र आङ्गलशब्देषु तथा भेदः कल्पयितुं न शक्यते, सर्वत्रैव समानप्रयोगस्य दर्शनात्।

द्वितीयम्, कालिदासस्य वचःसु अप्रचलितशब्दप्रयोगस्य समासबाहुल्यस्य च अभावः दृश्यते। तस्य वचः अपि आभाणकवत् स्वाभाविकं प्रयोगबाहुल्यं च अस्ति। यथा – "गुर्वपि विरहदुःखमाशाबन्धः साहयति"[3], "अवर्णनीयं परकलत्रम्"[4], "अथवानार्यः परदारव्यवहारः"[5], "अरण्ये मया रुदितमासीत्"[6], "को नामोष्णोदकेन नवमल्लिकां सिञ्चति"[7] इत्यादीनि बहूनि आभाणकसदृशानि वाक्यानि दरीदृश्यन्ते।

वस्तुतः, जोन्स्-महोदयकृतानुवादे अपि एतेषां वाक्यानाम् अनुवादः सम्यग् रीत्या दृश्यते, किन्तु तथा भावगाम्भीर्यं न प्रकाशते यथा कालिदासेषु प्रकाशते। यथा दिङ्मात्रमेकम् उदाह्रियते – "I have been crying, I find, in a wilderness" इति अरण्ये मया रुदितमासीत् इत्येतस्य अनुवादः।

**२) शैली**

"वैदर्भी कविता स्वयं वृतवती श्रीकालिदासं वरम्", "वैदर्भीरीतिसन्दर्भे कालिदासो विशिष्यते" इत्यादिसूक्तयः कालिदासस्य शैली कीदृशी आसीत् इति कथयन्ति, अर्थात् कालिदासस्य रचना माधुर्यव्यञ्जकवर्णैः ललितात्मिका आसीत् इत्यत्र सन्देहस्य लेशोऽपि नास्ति। वस्तुतः, संस्कृतजगति एका विशिष्टता वर्तते यत्, अत्र मनोगतभावनाः छन्दोबद्धाः कर्तुं शक्यन्ते। बहूनि छन्दांसि अस्मिन् विशाले संस्कृतजगति विद्यन्ते। कथनस्य

अभिप्रायोऽयं यत्, शाकुन्तले भावानां प्रकाशनाय बहूनां छन्दसाम् उपयोगः कृतः अस्ति।

किन्तु, जोन्स्-महोदयस्य अभिज्ञानशकुन्तलस्य अनुवादग्रन्थं पश्यामश्चेत् इदं सर्वत्र सप्तसु अङ्केषु एव दृश्यते यत्, तेन कालिदासस्य छन्दोबद्धपद्यानाम् अनुवादः गद्यमयरूपेण कृतः, अर्थात् तत्र पद्यानाम् उपयोगः न कृतः। उपयोगे सति पाठकानां सहृदयानां वा मनसि रसोत्पत्तेः उत्कर्षता इतोऽपि वर्धेत।

**३) अभिज्ञानाभरणम् अङ्गुलीयकम्**

कालिदासस्य नाटकस्यास्य नाम एव अभिज्ञानशकुन्तलम् इति। अतः अभिज्ञानम् अस्मिन् नाटके मुख्यं स्थानम् आवहति। अभिज्ञायते अनेन इति करणव्युत्पत्त्या अभिज्ञानशब्दस्य निष्पत्तिर्भवति। इदं च अभिज्ञानम् आभरणात्मकं भवति, कथं ज्ञायते इत्युक्ते प्रियंवदया दुर्वाससः वचनमुक्तं यत् – "ततो न मे वचनमन्यथा भवितुमर्हति, किं त्वभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यते"[8] इति। तथा च सम्प्रस्थितकाले राजर्षिणा दुष्यन्तेन स्वनामधेयाङ्कितम् अङ्गुलीयं शकुन्तलायै दत्तम्। अतः कालिदासवर्णितम् इदम् अभिज्ञानं न केवलम् आभरणम् अस्ति, अपि तु एका स्मृतिः, एकं भाग्यम्, एकः परिचयविशेषः एव। यस्य विच्युतेन आत्मपरिचयस्यापि विच्युतिः भवति।

एवमेव, जोन्स्-महोदयेनापि अस्य तथैव अनुवादः कृतः यथा कालिदासेन कृतः। परन्तु, तत्कृतानुवादे पाश्चात्यसंस्कृतिदृष्ट्या अङ्गुलीयकम् एकम् अनुरागस्य प्रेम्णः वा चिह्नमस्ति। तस्य दार्शनिकं तात्पर्यं तथा न द्योत्यते, यथा मूलांशे द्योत्यते। किमर्थमित्युक्ते यथा प्रियंवदया उक्तं दुर्वाससः वचः ईदृशम् आसीत् यत् – "ततो न मे वचनमन्यथा भवितुमर्हति, किं त्वभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यते" इति। एतस्य वाक्यस्य जोन्स्-महोदयेन अनुवादः इत्थम्प्रकारेण कृतः यत् – "My word must not be recalled; but the spell which it has raised shall be wholly removed when her lord shall see his ring" इति। कालिदासस्य मूलांशे एतत् अभिज्ञानाभरणम् आख्यातं, किञ्च तदनन्तरम् अङ्गुलीयकं स्मरणीयमिति अनुसूया चिन्तितवती, परन्तु अत्रानुवादे साक्षात् Ring इत्येव कथितम्। अत एवोक्तम् "The Fatal Ring" इति।

**४) रसोपस्थापनम्**

अस्माकं संस्कृतसाहित्ये काव्यलक्षणनिर्णयप्रसङ्गे बहवः स्वीयमतं प्रकटितवन्तः। तत्र प्रसिद्धं मतं साहित्यदर्पणकारेण उक्तम् – "वाक्यं रसात्मकं काव्यम्"[9] इति। तत्र नवसु प्रसिद्धेषु रसेषु शृङ्गाररसम् अधिकतया आत्मसात्कृतवान् अस्ति कविकुलगुरुः कालिदासः। तस्य रचनासु एव एतत् अतिगहनतया दरीदृश्यते। अभिज्ञानशकुन्तले अङ्गी रसो भवति शृङ्गाररसः, सोऽपि सम्भोगो विप्रलम्भः उभयः अपि। तत्रस्थः भावावेगः अपि क्रमशः स्वाभाविकतया च विकसितो भवति। शकुन्तलायाश्च दुःखं शान्तं, संयतरूपं, गहनं च। अतः कालिदासस्य एकम् एकं वाक्यं रसात्मकं भवति।

परन्तु, जोन्स्-महोदयकृतानुवादे अयम् अनुरागः पाश्चात्य-संस्कृत्यनुसारी अस्ति। तथा च एतत् Sentimental Romance इति कथयितुं शक्यते। रसस्य सूक्ष्मता कथञ्चित् नैतिकावेगपूर्णा अस्ति। क्वचित् शान्तत्वम् अतिरिच्य स्पष्टः भावावेगः वर्णितः। अतः इदं वक्तुं शक्यते यत्, कालिदासः भावं रसं वा प्रस्फोटयति परिव्यापयति वा, किन्तु जोन्स्-महोदयः भावं रसं वा वर्णयति एव।

**अलङ्कारोपस्थापनम्**

यथा "ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति"[10] तथैव, महाकवयः अलङ्कारान् विचिन्त्य काव्यं न रचयन्ति, काव्यरचनानन्तरम् अलङ्काराः स्वत एव काव्यम् अनुधावति इति कथयितुं शक्नुमः। वयं जानीमः एव कालिदासो भवति उपमासम्राट्। अतः अभिज्ञान-शकुन्तलस्य न केवलम् उपमालङ्कारस्य, अपि तु तदितराणाम् अलङ्काराणाम् अपि झङ्कारः दृश्यते। अर्थान्तरन्यासः समासोक्तिः अप्रस्तुतप्रशंसा इत्यादयः बहवोऽपि अलङ्काराः सवत्रैव दृश्यन्ते। यथा एकं दिङ्मात्रम् उदाहर्तुम् इच्छामि –

**"स्वप्नो नु माया नु मतिभ्रमो नु**
**क्लिष्टं नु तावत् फलमेव पुण्यम्।**
**असन्निवृत्त्यै तदतीतमेते**
**मनोरथा नाम तटप्रपाताः॥"**[11]

अस्मिन् पद्ये चत्वारः अलङ्काराः विद्यन्ते। यथा, सन्देहालङ्कारः, काव्यलिङ्गालङ्कारः, रूपकालङ्कारः, छेकवृत्यनुप्रासालङ्कारः चेति।

एवमेव, विलियामजोन्स्-महोदयकृतानुवादे अपि कालिदास-विरचितपद्यानाम् अनुवादः विहितो वर्तते इति सत्यम्। यद्यपि आङ्गलसाहित्ये अलङ्काराः सन्ति, तथापि अनुवादकरणे शब्दानां वा भावानां वा परिवर्तनेन कथञ्चिद् अलङ्काराः न परिलक्ष्यन्ते। अतः अनुवादे तस्मिन्नपि ध्यानं दत्तं येन अर्थपरिवर्तनं न भवेत्। तथापि कालिदासस्य मूलांशात् क्वचित् क्वचित् केचन अंशाः परित्यक्ताः सन्ति। यथा – "किमत्र चित्रं यदि विशाखे शशाङ्कलेखामनुवर्तेते"[12] इत्यस्य प्रसिद्धस्यापि भावगम्भीरात्मक-सारभूतस्य वाक्यस्य अनुवादः एव न विहितः जोन्स्-महोदयेन। यत्र अप्रस्तुतप्रशंसालङ्कारः स्पष्टतया दृश्यते।

**६) शकुन्तलायाः गुणवर्णनम्**

यद्यपि शकुन्तलायाः वर्णना महाभारतादौ विद्यते, तथापि कालिदासेन वर्णिता शकुन्तला अभूतपूर्वा एका सृष्टिः। कालिदासस्य सर्वेष्वपि ग्रन्थेषु सर्वास्वपि नायिकासु च इयं प्रकृतिपेलवा शकुन्तला सर्वोत्कृष्टा। कालिदासेन तस्याः गुणवर्णनं बहुषु पद्येषु करोति। यथा – "इदं किलाव्याजमनोहरं वपुः"[13], "अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू"[14], "स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे"[15], "मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः"[16], "इयमधिकमनोज्ञा वल्कलेनापि तन्वी"[17], "अखण्डं पुण्यानां फलमिव च तद्रूपमनघम्"[18], "अभ्युन्नता पुरस्तादवगाढा जघनगौरवात्

पश्चात्"[19] इत्यादिभिः बहुभिरपि पदैः शकुन्तलायाः वर्णनेन वयं सहृदयाः सततम् आचकिताः यत् कथम् ईदृशैः मनोहरैः पद्यैः एकस्याः वर्णनं कर्तुं शक्यते।

एवमेव, विलियामजोन्स्-महोदयकृतानुवादे अपि शकुन्तलायाः वर्णनं सुन्दरतया दृश्यते। पाश्चात्यसाहित्ये नायिकाः प्रेम्णि अधिकतया भावावेगपूर्णाः भवन्ति। तस्याः अनुरागस्तु सामान्य एव, यथा कालिदासस्य शकुन्तलायां दृश्यते तथैव। परन्तु जोन्स्-महोदयकृतानुवादे इयं शकुन्तला पाश्चात्यसाहित्येषु वर्णित-नायिकासदृशी भवति। तथा च सा स्पष्टभाषिणी अपि अस्ति। अतः क्वचित् सा भारतीयसंस्कृतौ न आपतति इति वक्तुं शक्यते। अपि च शकुन्तलायाः रूपवर्णने यथा कालिदासः शृङ्गारम् अलङ्कृतवन्तः, तथा अनुवादे अस्मिन् क्वचित् क्वचित् परित्यक्तमिति मन्ये। तद्यथा कालिदासेन उच्यते –

"अस्मिन् वेतसपरिक्षिप्ते लतामण्डपे सन्निहितया शकुन्तलया भवितव्यम्।

**अभ्युन्नता पुरस्तादवगाढा जघनगौरवात् पश्चात्।**
**द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा॥**"[20]

इत्येतस्य पद्यस्य अनुवादे कथ्यते यत् – "Happy lover! Sacontalá must be somewhere in this grove of flowering creepers; for I discern on the yellow sand at the door of yon arbour some recent footsteps, raised a little before, and depressed behind by the weight of her elegant limbs." इति। अर्थात् अत्र कथञ्चित् तस्याः रूपवर्णना परिवर्तिता।

अन्ततो गत्वा, इदं वक्तुं शक्यते यत्, कालिदासस्य अभिज्ञानशकुन्तलं भारतीयकाव्यतत्त्वस्य एकम् अतुलनीयं निदर्शनम्। तस्य च नाटकस्य अनुवादः भारतीयसंस्कृतिं सम्पूर्णविश्वे यद्यपि व्यापयति तथापि, पाश्चात्यदृष्ट्या कथञ्चित् परिवर्तितम्। अतः विषयद्वयमिदं तुलनात्मकसाहित्यस्य (Comparative literary study) आदर्शविषयत्वेन गणयितुं शक्यते।

**निष्कर्षः**

तुलनात्मकसाहित्यम् (Comparative Literature) अनुवाद-साहित्यं (Translation Studies) च परस्परं शैक्षणिकक्षेत्रं भाषागत-जातिगत-सांस्कृतिकपरिधिं च अतिक्रम्य साहित्यं पर्यालोचयतः। तुलनात्मकसाहित्यं पर्यालोच्य इदं ज्ञायते यत् कथंरूपेण साहित्यिकविषयाः परस्परं भाव्यन्ते प्रभाव्यन्ते च। एवमेव अनुवादसाहित्यं पर्यालोच्य इदं ज्ञातुं शक्यते यत् विभिन्नभाषागतपाठेषु अनुवादतत्त्वस्य प्रयोगस्य वा विश्लेषणं कथं भवति। इदम् उभयमपि क्षेत्रं परस्परं भावयति, यतो हि अनुवादो भवति तुलनात्मकसाहित्यस्य एकम् अपरिहार्यम् उपकरणं, यत् भिन्नसंस्कृतिषु भिन्नभाषासु च साहित्यपरिधिं सुलभ्यं करोति। तथा च, तुलनात्मकसाहित्यम् अनुवादस्य काठिन्यं प्रभावं च अवबोधयितुम् एकं समालोचनात्मकं क्षेत्रं निर्माति।

अतः, कालिदासेन विरचितम् अभिज्ञानशकुन्तलम्, विलियाम-जोन्स्-महोदयेन च अनूदितम् Sacontalá or, The Fatal Ring इत्युभयविधं काव्यसाहित्यं तुलनात्मकसाहित्यस्य (Comparative Literature) अनुवादसाहित्यस्य (Translation Studies) च विषयत्वेन परिगणयितुं शक्यते। अतः, अस्मिन् लेखे मया एतद्द्वयकाव्यस्य सामान्यरूपेण तुलना विहिता, यस्याः अध्ययनेन वयमेतत् ज्ञातुं शक्नुमः यत् भारतीयसाहित्यं पाश्चात्यसाहित्यात् बहुधा भिद्यत इति शम्।

**परिशीलितग्रन्थावली**


१) मिश्र, राजदेव, राय, शुचिता, *अभिज्ञानशाकुन्तलम्,* फैजाबाद, घनश्यामदास एण्ड सन्स, २००० ई.

२) Jones, Sir William, *Sacontalá or, The Fatal Ring,* Calcutta: J. Ghose & Co., 32, Jhamapookur Lane, London: Trubner & Co., 57 & 59, Ludgate Hill, 1876


**संदर्भ-सूची**

1 अभिज्ञानशाकुन्तलम्, डॉ. राजदेव मिश्र, डॉ. शुचिता राय, पृ - 33
2 अभिज्ञानशकुन्तलम्, चतुर्थः अङ्कः
3 अभिज्ञानशकुन्तलम्, चतुर्थः अङ्कः
4 अभिज्ञानशकुन्तलम्, पञ्चमः अङ्कः
5 अभिज्ञानशकुन्तलम्, सप्तमः अङ्कः
6 अभिज्ञानशकुन्तलम्, द्वितीयः अङ्कः
7 अभिज्ञानशकुन्तलम्, चतुर्थः अङ्कः
8 अभिज्ञानशकुन्तलम्, चतुर्थः अङ्कः
9 साहित्यदर्पणः, प्रथमः परिच्छेदः
10 उत्तररामचरितम्, प्रथमः अङ्कः, श्लोकः - 10
11 अभिज्ञानशकुन्तलम्, षष्ठः अङ्कः
12 अभिज्ञानशकुन्तलम्, तृतीयः अङ्कः
13 अभिज्ञानशकुन्तलम्, प्रथमः अङ्कः, श्लोकः - 18
14 अभिज्ञानशकुन्तलम्, प्रथमः अङ्कः, श्लोकः - 21
15 अभिज्ञानशकुन्तलम्, द्वितीयः अङ्कः, श्लोकः - 9
16 अभिज्ञानशकुन्तलम्, प्रथमः अङ्कः, श्लोकः - 25
17 अभिज्ञानशकुन्तलम्, प्रथमः अङ्कः, श्लोकः - 17
18 अभिज्ञानशकुन्तलम्, द्वितीयः अङ्कः, श्लोकः - 10
19 अभिज्ञानशकुन्तलम्, तृतीयः अङ्कः, श्लोकः - 6
20 अभिज्ञानशकुन्तलम्, तृतीयः अङ्कः, श्लोकः - 6